VEDA UNION

# Rudram 11

Śrī Rudram Camakam Svāhākara Vidhiḥ

Devanāgarī and transliteration text.

# Śrī Rudram

1 ॐ नमो भगवते रुद्राय ॥

om namo bhagavate rudrāya | |

2 ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत नमः स्वाहा ॥

om namaste rudra manyava utota iṣave namaḥ | namaste astu dhanvane bāhubhyāmuta te namaḥ svāhā | |

3 या त इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय स्वाहा ॥

yā ta iṣuḥ śivatamā śivaṁ babhūva te dhanuḥ | śivā śaravyā yā tava tayā no rudra mṛḍaya svāhā | |

4 या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा शन्तमया गिरिशंताभिचाकशीहि स्वाहा ॥

yā te rudra śivā tanūraghorā'pāpakāśinī | tayā nastanuvā śantamayā giriśaṁtābhicākaśīhi svāhā | |

5 यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिंग्ंसीः पुरुषं जगत्स्वाहा ॥

yāmiṣuṁ giriśaṁta haste bibharṣyastave | śivāṁ giritra tāṁ kuru mā higṁsīḥ puruṣaṁ jagatsvāhā | |

6 शिवेन वचसा त्वा गिरिशाच्छावदामसि । यथा नः सर्वमिज्जगदयक्ष्मग्ं सुमना असत्स्वाहा ॥

śivena vacasā tvā giriśācchāvadāmasi | yathā naḥ sarvamijjagadayakṣmagṁ sumanā asatsvāhā | |

7 अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीग्श्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः स्वाहा ॥

adhyavocadadhivaktā prathamo daivyo bhiṣak | ahīgśca sarvāñjambhayantsarvāśca yātudhānyaḥ svāhā | |

8 असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चेमाग्ं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाग्ं हेड ईमहे स्वाहा ॥

asau yastāmro aruṇa uta babhruḥ sumaṅgalaḥ | ye cemāgṁ rudrā abhito dikṣu śritāḥ sahasraśo'vaiṣāgṁ heḍa īmahe svāhā | |

9 असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृशन्नदृशन्नुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः स्वाहा ॥

asau yo'vasarpati nīlagrīvo vilohitaḥ | utainaṁ gopā adṛśannadṛśannudahāryaḥ | utainaṁ viśvā bhūtāni sa dṛṣṭo mṛḍayāti naḥ svāhā | |

10 नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य सत्त्वानोऽहं तेभ्योऽकरन्नमः स्वाहा ॥

namo astu nīlagrīvāya sahasrākṣāya mīḍhuṣe | atho ye asya sattvāno'haṁ tebhyo'karannamaḥ svāhā | |

11 प्रमु॑ञ्च॒ धन्व॑न॒स्त्वमु॒भयो॒रार्त्नि॑ यो॒र्ज्याम् । याश्च॑ ते॒ हस्त॒ इष॑वः॒ परा॒ ता भ॑गवो वप॒ स्वाहा᳚ ॥

pramu̍ñca̱ dhanva̍na̱stvamu̱bhayo̱rārtni̍ yo̱rjyām | yāśca̍ te̱ hasta̱ iṣa̍va̱ḥ parā̱ tā bha̍gavo vapa̱ svāhā̎ ||

12 अ॒व॒तत्य॒ धनु॒स्त्वगं॑ सह॑स्राक्ष॒ शते॑षुधे । नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो नः॑ सु॒मना॑ भव॒ स्वाहा᳚ ॥

a̱va̱tatya̱ dhanu̱stvagṁ saha̍srākṣa̱ śate̍ṣudhe | ni̱śīrya̍ śa̱lyānā̱ṁ mukhā̍ śi̱vo na̍ḥ su̱manā̍ bhava̱ svāhā̎ ||

13 वि॒ज्यं॒ धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाग्ं उ॒त । अने॑शन्न॒स्येष॑व आ॒भुर॑स्य निष॒ङ्गथिः॑ स्वाहा᳚ ॥

vijya̱ṁ dhanu̍ḥ kapa̱rdino̱ viśa̍lyo̱ bāṇa̍vāgṁ u̱ta | ane̍śanna̱syeṣa̍va ā̱bhura̍sya niṣa̱ṁgathi̱ḥ svāhā̎ ||

14 या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनुः॑ । तया॒ऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज॒ स्वाहा᳚ ॥

yā te̍ he̱tirmī̍ḍhuṣṭama̱ haste̍ ba̱bhūva̍ te̱ dhanu̍ḥ | tayā̱'smān vi̱śvata̱stvama̍ya̱kṣmayā̱ pari̍bbhuja̱ svāhā̎ ||

15 नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय धृ॒ष्णवे᳚ । उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्या॒ं तव॒ धन्व॑ने॒ स्वाहा᳚ ।

nama̍ste a̱stvāyu̍dhā̱yānā̍tatāya dhṛ̱ṣṇave̎ | u̱bhābhyā̍mu̱ta te̱ namo̍ bā̱hubhyā̱ṁ tava̱ dhanva̍ne̱ svāhā̎ ||

16 परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वतः॑ । अथो॒ य इ॑षु॒धिस्तवा॒रे अ॒स्मन्निधे॑हि॒ तग्ग् स्वाहा᳚ ॥

pari̍ te̱ dhanva̍no he̱tira̱smānvṛ̱̍ṇaktu vi̱śvata̍ḥ | atho̱ ya i̍ṣu̱dhistavā̱re a̱smannidhe̍hi̱ tagg svāhā̎ ||

17 नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमः॒ स्वाहा᳚ ॥

namo̱ hira̍ṇyabāhave senā̱nye̍ di̱śāṁ ca̱ pata̍ye̱ nama̱ḥ svāhā̎ ||

18 नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः पशू॒नां पत॑ये॒ नमः॒ स्वाहा᳚ ॥

namo̍ vṛ̱kṣebhyo̱ hari̍keśebhyaḥ paśū̱nāṁ pata̍ye̱ nama̱ḥ svāhā̎ ||

19 नमः॑ स॒स्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नमः॒ स्वाहा᳚ ॥

nama̍ḥ sa̱spiñja̍rāya̱ tviṣī̍mate pathī̱nāṁ pata̍ye̱ nama̱ḥ svāhā̎ ||

20 नमो॑ बभ्लु॒शाय॑ विव्या॒धिनेऽन्ना॑ना॒ं पत॑ये॒ नमः॒ स्वाहा᳚ ॥

namo̍ babhlu̱śāya̍ vivyā̱dhine'nnā̍nā̱ṁ pata̍ye̱ nama̱ḥ svāhā̎ ||

21 नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः स्वाहा ॥

namo harikeśāyopavītine puṣṭānāṁ pataye namaḥ svāhā ||

22 नमो भवस्य हेत्यै जगतां पतये नमः स्वाहा ॥

namo bhavasya hetyai jagatāṁ pataye namaḥ svāhā ||

23 नमो रुद्रायाततताविने क्षेत्राणां पतये नमः स्वाहा ॥

namo rudrāyātatāvine kṣetrāṇāṁ pataye namaḥ svāhā ||

24 नमः सूतायाहन्त्याय वनानां पतये नमः स्वाहा ॥

namaḥ sūtāyāhantyāya vanānāṁ pataye namaḥ svāhā ||

25 नमो रोहिताय स्थपतये वृक्षाणं पतये नमः स्वाहा ॥

namo rohitāya sthapataye vṛkṣāṇaṁ pataye namaḥ svāhā ||

26 नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमः स्वाहा ॥

namo mantriṇe vāṇijāya kakṣāṇāṁ pataye namaḥ svāhā ||

27 नमो भुवंतये वारिवस्कृतायौषधीनां पतये नमः स्वाहा ॥

namo bhuvaṁtaye vārivaskṛtāyauṣadhīnāṁ pataye namaḥ svāhā ||

28 नम उच्चैर्घोषायाक्रन्दयते पत्तीनाम् पतये नमः स्वाहा ॥

nama uccairghoṣāyākrandayate pattīnām pataye namaḥ svāhā ||

29 नमः कृत्स्नवीताय धावते सत्त्वनां पतये नमः स्वाहा ॥

namaḥ kṛtsnavītāya dhāvate sattvanāṁ pataye namaḥ svāhā ||

30 नमः सहमानाय निव्यादिन आव्याधिनीनां पतये नमः स्वाहा ॥

namaḥ sahamānāya nivyādina āvyādhinīnāṁ pataye namaḥ svāhā ||

31 नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमः स्वाहा ॥

namaḥ kakubhāya niṣaṅgiṇe stenānāṁ pataye namaḥ svāhā ||

32 नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः स्वाहा ॥

namo niṣaṅgiṇa iṣudhimate taskarāṇāṁ pataye namaḥ svāhā ||

33 नमो वञ्चते परिवञ्चते स्तायूनां पतये नमः स्वाहा ॥

namo vañcate parivañcate stāyūnāṁ pataye namaḥ svāhā ||

34 नमो॑ निचे॒रवे॑ परिच॒राया॑र॒ण्याना॒ं पत॑ये॒ नम॒ः स्वाहा᳚ ॥

namo̍ nice̱rave̍ parica̱rāyāra̍ṇyānā̱ṁ pata̍ye̱ nama̱ḥ svāhā̎ | |

35 नमः॑ सृका॒विभ्यो॒ जिघा॑ग्ंसद्भ्यो मुष्णतां पत॑ये नम॒ः स्वाहा᳚ ॥

nama̍ḥ sṛkā̱vibhyo̱ jighā̍gṁsadbhyo muṣṇa̱tāṁ pata̍ye̱ nama̱ḥ svāhā̎ | |

36 नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒चर॑द्भ्यः प्रकृ॒न्तानां॒ पत॑ये॒ नम॒ः स्वाहा᳚ ॥

namo̍'si̱madbhyo̱ naktaṁ̱cara̍dbhyaḥ prakṛ̱ntānā̱ṁ pata̍ye̱ nama̱ḥ svāhā̎ | |

37 नम॑ उष्णी॒षिणे॑ गिरिच॒राय॑ कुलु॒ञ्चानां॒ पत॑ये॒ नम॒ः स्वाहा᳚ ॥

nama̍ uṣṇī̱ṣiṇe̍ girica̱rāya̍ kulu̱ñcānā̱ṁ pata̍ye̱ nama̱ḥ svāhā̎ | |

38 नम॒ इषु॑मद्भ्यो धन्वा॒विभ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̱ iṣu̍madbhyo dhanvā̱vibhya̍śca vo̱ nama̱ḥ svāhā̎ | |

39 नम॑ आतन्वा॒नेभ्य॑ः प्रति॒दधा॑नेभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̍ ātanvā̱nebhya̍ḥ prati̱dadhā̍nebhyaśca vo̱ nama̱ḥ svāhā̎ | |

40 नम॑ आ॒यच्छ॑द्भ्यो विसृ॒जद्भ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̍ ā̱yaccha̍dbhyo visṛ̱jadbhya̍śca vo̱ nama̱ḥ svāhā̎ | |

41 नमोऽस्य॑द्भ्यो॒ विध्य॑द्भ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

namo'sya̍dbhyo̱ vidhya̍dbhyaśca vo̱ nama̱ḥ svāhā̎ | |

42 नम॒ आसी॑नेभ्यः॒ शया॑नेभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̱ āsī̍nebhya̱ḥ śayā̍nebhyaśca vo̱ nama̱ḥ svāhā̎ | |

43 नमः॑ स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̍ḥ sva̱padbhyo̱ jāgra̍dbhyaśca vo̱ nama̱ḥ svāhā̎ | |

44 नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̱stiṣṭha̍dbhyo̱ dhāva̍dbhyaśca vo̱ nama̱ḥ svāhā̎ | |

45 नमः॑ स॒भाभ्य॑ः स॒भाप॑तिभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̍ḥ sa̱bhābhya̍ḥ sa̱bhāpa̍tibhyaśca vo̱ nama̱ḥ svāhā̎ | |

46 नमो॒ अश्वे॒भ्योऽश्व॑पतिभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

namo̱ aśve̱bhyo'śva̍patibhyaśca vo̱ nama̱ḥ svāhā̎ | |

47 नम॑ आव्या॒धिनी᳚भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̍ āvyā̱dhinī̎bhyo vi̱vidhya̍ntībhyaśca vo̱ nama̱ḥ svāhā̎ | |

48 नम॒ उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̱ uga̍ṇābhyastṛgm̐ha̱tībhya̍śca vo̱ nama̱ḥ svāhā᳚ ||

49 नमो॑ गृ॒त्सेभ्यो॑ गृ॒त्सप॑तिभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

namo̍ gṛ̱tsebhyo̍ gṛ̱tsapa̍tibhyaśca vo̱ nama̱ḥ svāhā᳚ ||

50 नमो॒ व्राते᳚भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

namo̱ vrāte᳚bhyo̱ vrāta̍patibhyaśca vo̱ nama̱ḥ svāhā᳚ ||

51 नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

namo̍ ga̱ṇebhyo̍ ga̱ṇapa̍tibhyaśca vo̱ nama̱ḥ svāhā᳚ ||

52 नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

namo̱ virū̍pebhyo vi̱śvarū̍pebhyaśca vo̱ nama̱ḥ svāhā᳚ ||

53 नमो॑ म॒हद्भ्य॑ः क्षुल्ल॒केभ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

namo̍ ma̱hadbhya̍ḥ kṣulla̱kebhya̍śca vo̱ nama̱ḥ svāhā᳚ ||

54 नमो॑ र॒थिभ्यो॑ऽर॒थेभ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

namo̍ ra̱thibhyo̍'ra̱thebhya̍śca vo̱ nama̱ḥ svāhā᳚ ||

55 नमो॒ रथे᳚भ्यो॒ रथ॑पतिभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

namo̱ rathe᳚bhyo̱ ratha̍patibhyaśca vo̱ nama̱ḥ svāhā᳚ ||

56 नम॒ः सेना᳚भ्यः सेना॒निभ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̱ḥ senā᳚bhyaḥ senā̱nibhya̍śca vo̱ nama̱ḥ svāhā᳚ ||

57 नम॑ः क्ष॒त्तृभ्य॑ः संग्रही॒तृभ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̍ḥ kṣa̱ttṛbhya̍ḥ saṁgrahī̱tṛbhya̍śca vo̱ nama̱ḥ svāhā᳚ ||

58 नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̱stakṣa̍bhyo rathakā̱rebhya̍śca vo̱ nama̱ḥ svāhā᳚ ||

59 नम॒ः कुला॑लेभ्यः क॒र्मारे᳚भ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̱ḥ kulā̍lebhyaḥ ka̱rmāre᳚bhyaśca vo̱ nama̱ḥ svāhā᳚ ||

60 नम॑ः पु॒ञ्जिष्टे᳚भ्यो निषा॒देभ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̍ḥ pu̱ñjiṣṭe᳚bhyo niṣā̱debhya̍śca vo̱ nama̱ḥ svāhā᳚ ||

61 नम॑ इषु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̍ iṣu̱kṛdbhyo̍ dhanva̱kṛdbhya̍śca vo̱ nama̱ḥ svāhā᳚ ||

62 नमो॑ मृग॒युभ्य॑ः श्व॒निभ्य॑श्च वो॒ नम॒ः स्वाहा᳚ ॥

namo̍ mṛga̱yubhya̍ḥ śva̱nibhya̍śca vo̱ nama̱ḥ svāhā᳚ ||

63 नम॒ः श्वभ्य॒ः श्वप॑तिभ्यश्च वो॒ नम॒ः स्वाहा᳚ ॥

nama̱ḥ śvabhya̱ḥ śvapa̍tibhyaśca vo̱ nama̱ḥ svāhā᳚ ||

64 नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒ स्वाहा᳚ ॥

namo̍ bha̱vāya̍ ca ru̱drāya̍ ca̱ svāhā̎ ||

65 नमः॑ श॒र्वाय॑ च पशु॒पत॑ये च॒ स्वाहा᳚ ॥

nama̍ḥ śa̱rvāya̍ ca paśu̱pata̍ye ca̱ svāhā̎ ||

66 नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒ स्वाहा᳚ ॥

namo̱ nīla̍grīvāya ca śiti̱kaṇṭhā̍ya ca̱ svāhā̎ ||

67 नमः॑ कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒ स्वाहा᳚ ॥

nama̍ḥ kapa̱rdine̍ ca̱ vyu̍ptakeśāya ca̱ svāhā̎ ||

68 नमः॑ सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒ स्वाहा᳚ ॥

nama̍ḥ sahasrā̱kṣāya̍ ca śa̱tadha̍nvane ca̱ svāhā̎ ||

69 नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒ स्वाहा᳚ ॥

namo̍ giri̱śāya̍ ca śipivi̱ṣṭāya̍ ca̱ svāhā̎ ||

70 नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒ स्वाहा᳚ ॥

namo̍ mī̱ḍhuṣṭa̍māya̱ ceṣu̍mate ca̱ svāhā̎ ||

71 नमो᳚ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒ स्वाहा᳚ ॥

namo̎ hra̱svāya̍ ca vāma̱nāya̍ ca̱ svāhā̎ ||

72 नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒ स्वाहा᳚ ॥

namo̍ bṛha̱te ca̱ varṣī̍yase ca̱ svāhā̎ ||

73 नमो॑ वृ॒द्धाय॑ च सं॒वृध्व॑ने च॒ स्वाहा᳚ ॥

namo̍ vṛ̱ddhāya̍ ca saṁ̱vṛdhva̍ne ca̱ svāhā̎ ||

74 नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒ स्वाहा᳚ ॥

namo̱ agri̍yāya ca pratha̱māya̍ ca̱ svāhā̎ ||

75 नम॑ आ॒शवे॑ चाजि॒राय॑ च॒ स्वाहा᳚ ॥

nama̍ ā̱śave̍ cāji̱rāya̍ ca̱ svāhā̎ ||

76 नम॒ः शीघ्रि॑याय च॒ शीभ्या॑य च॒ स्वाहा᳚ ॥

nama̱ḥ śīghri̍yāya ca̱ śībhyā̍ya ca̱ svāhā̎ ||

77 नम॑ ऊ॒र्म्या॑य चावस्व॒न्या॑य च॒ स्वाहा᳚ ॥

nama̍ ū̱rmyā̍ya cāvasva̱nyā̍ya ca̱ svāhā̎ ||

78 नमः॑ स्रोत॒स्या॑य च॒ द्वीप्या॑य च॒ स्वाहा᳚ ॥ ॥

nama̍ḥ srota̱syā̍ya ca̱ dvīpyā̍ya ca̱ svāhā̎ ||

79 नमो᳚ ज्येष्ठाय॑ च कनि॒ष्ठाय॑ च॒ स्वाहा᳚ ॥

namo̎ jyeṣṭhāya̍ ca kani̱ṣṭhāya̍ ca̱ svāhā̎ ||

80 नमः पूर्वजाय चापरजाय च स्वाहा ॥

namaḥ pūrvajāya cāparajāya ca svāhā ||

81 नमो मध्यमाय चापगल्भाय च स्वाहा ॥

namo madhyamāya cāpagalbhāya ca svāhā ||

82 नमो जघन्याय च बुध्नियाय च स्वाहा ॥

namo jaghanyāya ca budhniyāya ca svāhā ||

83 नमः सोभ्याय च प्रतिसर्याय च स्वाहा ॥

namaḥ sobhyāya ca pratisaryāya ca svāhā ||

84 नमो याम्याय च क्षेम्याय च स्वाहा ॥

namo yāmyāya ca kṣemyāya ca svāhā ||

85 नम उर्वर्याय च खल्याय च स्वाहा ॥

nama urvaryāya ca khalyāya ca svāhā ||

86 नमः श्लोक्याय चाऽवसान्याय च स्वाहा ॥

namaḥ ślokyāya cā'vasānyāya ca svāhā ||

87 नमो वन्याय च कक्ष्याय च स्वाहा ॥

namo vanyāya ca kakṣyāya ca svāhā ||

88 नमः श्रवाय च प्रतिश्रवाय च स्वाहा ॥

namaḥ śravāya ca pratiśravāya ca svāhā ||

89 नम आशुषेणाय चाशुरथाय च स्वाहा ॥

nama āśuṣeṇāya cāśurathāya ca svāhā ||

90 नमः शूराय चावभिन्दते च स्वाहा ॥

namaḥ śūrāya cāvabhindate ca svāhā ||

91 नमो वर्मिणे च वरूथिने च स्वाहा ॥

namo varmiṇe ca varūthine ca svāhā ||

92 नमो बिल्मिने च कवचिने च स्वाहा ॥

namo bilmine ca kavacine ca svāhā ||

93 नमः श्रुताय च श्रुतसेनाय च स्वाहा ॥ ॥

namaḥ śrutāya ca śrutasenāya ca svāhā || ||

94 नमो दुन्दुभ्याय चाहनन्याय च स्वाहा ॥

namo dundubhyāya cāhananyāya ca svāhā ||

95 नमो धृष्णवे च प्रमृशाय च स्वाहा ॥

namo dhṛṣṇave ca pramṛśāya ca svāhā ||

96 नमो॑ दू॒ताय॑ च॒ प्रहि॑ताय च॒ स्वाहा᳚ ॥

namo̍ dū̱tāya̍ ca̱ prahi̍tāya ca̱ svāhā̎ ||

97 नमो॑ निष॒ङ्गिणे॑ चेषु॒धिमते॑ च॒ स्वाहा᳚ ॥

namo̍ niṣa̱ṅgiṇe̍ ceṣudhi̱mate̍ ca̱ svāhā̎ ||

98 नम॑स्ती॒क्ष्णेष॑वे चायु॒धिने॑ च॒ स्वाहा᳚ ॥

nama̍stī̱kṣṇeṣa̍ve cāyu̱dhine̍ ca̱ svāhā̎ ||

99 नम॑ः स्वायु॒धाय॑ च सु॒धन्व॑ने च॒ स्वाहा᳚ ॥

nama̍ḥ svāyu̱dhāya̍ ca su̱dhanva̍ne ca̱ svāhā̎ ||

100 नम॒ः स्रुत्या॑य च॒ पथ्या॑य च॒ स्वाहा᳚ ॥

nama̱ḥ srutyā̍ya ca̱ pathyā̍ya ca̱ svāhā̎ ||

101 नम॑ः का॒ट्या॑य च नी॒प्या॑य च॒ स्वाहा᳚ ॥

nama̍ḥ kā̱ṭyā̍ya ca nī̱pyā̍ya ca̱ svāhā̎ ||

102 नम॒ः सूद्या॑य च सर॒स्या॑य च॒ स्वाहा᳚ ॥

nama̱ḥ sūdyā̍ya ca sara̱syā̍ya ca̱ svāhā̎ ||

103 नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ च॒ स्वाहा᳚ ॥

namo̍ nā̱dyāya̍ ca vaiśa̱ntāya̍ ca̱ svāhā̎ ||

104 नम॒ः कूप्या॑य चाव॒ट्या॑य च॒ स्वाहा᳚ ॥

nama̱ḥ kūpyā̍ya cāva̱ṭyā̍ya ca̱ svāhā̎ ||

105 नमो॒ वर्ष्या॑य चाव॒र्ष्याय॑ च॒ स्वाहा᳚ ॥

namo̱ varṣyā̍ya cāva̱rṣyāya̍ ca̱ svāhā̎ ||

106 नमो॑ मे॒घ्या॑य च विद्यु॒त्या॑य च॒ स्वाहा᳚ ॥

namo̍ me̱ghyā̍ya ca vidyu̱tyā̍ya ca̱ svāhā̎ ||

107 नम॑ ई॒ध्रिया॑य चात॒प्या॑य च॒ स्वाहा᳚ ॥

nama̍ ī̱dhriyā̍ya cāta̱pyā̍ya ca̱ svāhā̎ ||

108 नमो॒ वात्या॑य च॒ रेष्मि॑याय च॒ स्वाहा᳚ ॥

namo̱ vātyā̍ya ca̱ reṣmi̍yāya ca̱ svāhā̎ ||

109 नमो॑ वास्त॒व्या॑य च वास्तु॒ पाय॑ च॒ स्वाहा᳚ ॥ ॥

namo̍ vāsta̱vyā̍ya ca vāstu̱ pāya̍ ca̱ svāhā̎ ||

110 नम॒ः सोमा॑य च रु॒द्राय॑ च॒ स्वाहा᳚ ॥

nama̱ḥ somā̍ya ca ru̱drāya̍ ca̱ svāhā̎ ||

111 नम॑स्ता॒म्राय॑ चारु॒णाय॑ च॒ स्वाहा᳚ ॥

nama̍stā̱mrāya̍ cāru̱ṇāya̍ ca̱ svāhā̎ ||

112 नमः शङ्गाय च पशुपतये च स्वाहा ॥

namaḥ śaṅgāya ca paśupataye ca svāhā ||

113 नम उग्राय च भीमाय च स्वाहा ॥

nama ugrāya ca bhīmāya ca svāhā ||

114 नमो अग्रेवधाय च दूरेवधाय च स्वाहा ॥

namo agrevadhāya ca dūrevadhāya ca svāhā ||

115 नमो हन्त्रे च हनीयसे च स्वाहा ॥

namo hantre ca hanīyase ca svāhā ||

116 नमो वृक्षेभ्यो हरिकेशेभ्यः स्वाहा ॥

namo vṛkṣebhyo harikeśebhyaḥ svāhā ||

117 नमस्ताराय स्वाहा ॥

namastārāya svāhā ||

118 नमश्शंभवे च मयोभवे च स्वाहा ॥

namaśśaṁbhave ca mayobhave ca svāhā ||

119 नमः शङ्कराय च मयस्कराय च स्वाहा ॥

namaḥ śaṅkarāya ca mayaskarāya ca svāhā ||

120 नमः शिवाय च शिवतराय च स्वाहा ॥

namaḥ śivāya ca śivatarāya ca svāhā ||

121 नमस्तीर्थ्याय च कूल्याय च स्वाहा ॥

namastīrthyāya ca kūlyāya ca svāhā ||

122 नमः पार्याय चावार्याय च स्वाहा ॥

namaḥ pāryāya cāvāryāya ca svāhā ||

123 नमः प्रतरणाय चोत्तरणाय च स्वाहा ॥

namaḥ prataraṇāya cottaraṇāya ca svāhā ||

124 नम आतार्याय चालाद्याय च स्वाहा ॥

nama ātāryāya cālādyāya ca svāhā ||

125 नमः शष्प्याय च फेन्याय च स्वाहा ॥

namaḥ śaṣpyāya ca phenyāya ca svāhā ||

126 नमः सिकत्याय च प्रवाह्याय च स्वाहा ॥ ॥

namaḥ sikatyāya ca pravāhyāya ca svāhā || ||

127 नम इरिण्याय च प्रपथ्याय च स्वाहा ॥

nama iriṇyāya ca prapathyāya ca svāhā ||

128 नम॑ः किग्ँशि॒लाय॑ च॒ क्षय॑णाय च॒ स्वाहा᳚ ॥

nama̍ḥ kigṁśi̱lāya̍ ca̱ kṣaya̍ṇāya ca̱ svāhā̎ ||

129 नम॑ः कप॒र्दिने॑ च पुल॒स्तये॑ च॒ स्वाहा᳚ ॥

nama̍ḥ kapa̱rdine̍ ca pula̱staye̍ ca̱ svāhā̎ ||

130 नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च॒ स्वाहा᳚ ॥

namo̱ goṣṭhyā̍ya ca̱ gṛhyā̍ya ca̱ svāhā̎ ||

131 नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒ स्वाहा᳚ ॥

nama̱stalpyā̍ya ca̱ gehyā̍ya ca̱ svāhā̎ ||

132 नम॑ः का॒ट्या॑य च गह्वरे॒ष्ठाय॑ च॒ स्वाहा᳚ ॥

nama̍ḥ kā̱ṭyā̍ya ca gahvare̱ṣṭhāya̍ ca̱ svāhā̎ ||

133 नमो᳚ ह्रद॒य्या॑य च निवे॒ष्प्या॑य च॒ स्वाहा᳚ ॥

namo̎ hrada̱yyā̍ya ca nive̱ṣpyā̍ya ca̱ svāhā̎ ||

134 नम॑ः पाग्ँ स॒व्या॑य च रज॒स्या॑य च॒ स्वाहा᳚ ॥

nama̍ḥ pāgṁ sa̱vyā̍ya ca raja̱syā̍ya ca̱ svāhā̎ ||

135 नम॒ः शुष्क्या॑य च हरि॒त्या॑य च॒ स्वाहा᳚ ॥

nama̱ḥ śuṣkyā̍ya ca hari̱tyā̍ya ca̱ svāhā̎ ||

136 नमो॒ लोप्या॑य चोल॒प्या॑य च॒ स्वाहा᳚ ॥

namo̱ lopyā̍ya cola̱pyā̍ya ca̱ svāhā̎ ||

137 नम॑ ऊ॒र्व्या॑य च सू॒र्म्या॑य च॒ स्वाहा᳚ ॥

nama̍ ū̱rvyā̍ya ca sū̱rmyā̍ya ca̱ svāhā̎ ||

138 नम॑ः प॒र्ण्या॑य च पर्णश॒द्या॑य च॒ स्वाहा᳚ ॥

nama̍ḥ pa̱rṇyā̍ya ca parṇaśa̱dyā̍ya ca̱ svāhā̎ ||

139 नमो॑ऽपगु॒रमा॑णाय चाभिघ्न॒ते च॒ स्वाहा᳚ ॥

namo̍'pagu̱ramā̍ṇāya cābhighna̱te ca̱ svāhā̎ ||

140 नम॑ आख्खिद॒ते च॑ प्रख्खिद॒ते च॒ स्वाहा᳚ ॥

nama̍ ākhkhida̱te ca̍ prakhkhida̱te ca̱ svāhā̎ ||

141 नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ग्ं हृद॑येभ्यः स्वाहा᳚ ॥

namo̍ vaḥ kiri̱kebhyo̍ de̱vānā̱gṁ hṛda̍yebhya̱ḥ svāhā̎ ||

142 नमो॑ विक्षीण॒केभ्यो॑ दे॒वाना॒ग्ं हृद॑येभ्यः स्वाहा᳚ ॥

namo̍ vikṣīṇa̱kebhyo̍ de̱vānā̱gṁ hṛda̍yebhya̱ḥ svāhā̎ ||

143 नमो॑ विचिन्व॒त्केभ्यो॑ दे॒वाना॒ग्ं हृद॑येभ्यः स्वाहा᳚ ॥

namo̍ vicinva̱tkebhyo̍ de̱vānā̱gṁ hṛda̍yebhya̱ḥ svāhā̎ ||

144 नम॑ आनिर्ह॒तेभ्यो॑ दे॒वाना॒ग्ं॒ हृद॑येभ्यः स्वाहा॓ ॥

nama̍ ānirha̱tebhyo̍ de̱vānā̱gṁ̱ hṛda̍yebhya̱ḥ svāhā̎ ||

145 नम॑ आमीव॒त्केभ्यो॑ दे॒वाना॒ग्ं॒ हृद॑येभ्यः स्वाहा॓ ॥

nama̍ āmīva̱tkebhyo̍ de̱vānā̱gṁ̱ hṛda̍yebhya̱ḥ svāhā̎ ||

146 द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒न्नील॑लोहित । ए॒षां पुरु॑षाणामे॒षां प॑शू॒नां मा भेर्मा॑ऽरो॒ मो ए॑षां॒ किंच॒नाम॑मत्स्वाहा॓ ॥

drāpe̱ andha̍saspate̱ dari̍dra̱nnīla̍lohita | e̱ṣā̱ṁ puru̍ṣāṇāme̱ṣāṁ pa̍śū̱nāṁ mā bhermā̍'ro̱ mo e̍ṣā̱ṁ kiṁca̱nāma̍ma̱tsvāhā̎ ||

147 या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाह॑भेषजी । शि॒वा रु॒द्रस्य॑ भेष॒जी तया॑ नो मृड जी॒वसे॒ स्वाहा॓ ॥

yā te̍ rudra śi̱vā ta̱nūḥ śi̱vā vi̱śvāha̍bheṣajī | śi̱vā ru̱drasya̍ bheṣa̱jī tayā̍ no mṛ̱ḍa jī̱vase̱ svāhā̎ ||

148 इ॒मागं॒ रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॓ क्षयद्वी॑राय॒ प्रभ॑रामहे म॒तिम् । यथा॑ नः॒ शमस॑द्द्वि॒पदे॒ चतु॑ष्पदे॒ विश्वं॑ पु॒ष्टं ग्रामे॑ अ॒स्मिन्ननाा॑तु॒रग्ग्॒ स्वाहा॓ ॥

i̱māgṁ ru̱drāya̍ ta̱vase̍ kapa̱rdine̎ kṣa̱yadvīrāya̱ prabha̍rāmahe ma̱tim | yathā̍ na̱ḥ śamasa̍ddvi̱pade̱ catu̍ṣpade̱ viśva̍ṁ pu̱ṣṭa̍ṁ grāme̍ a̱sminnanā̍tura̱gg svāhā̎ ||

149 मृ॒डा नो॑ रुद्रो॒त नो॒ मय॑स्कृधि क्ष॒यद्वी॑राय॒ नम॑सा विधेम ते । यच्छं॒ च॒ योश्च॒ मनु॑राय॒जे पि॒ता तद॑श्याम॒ तव॑ रुद्र॒ प्रणी॑तौ॒ स्वाहा॓ ॥

mṛ̱ḍā no̍ rudro̱ta no̱ maya̍skṛdhi kṣa̱yadvī̍rāya̱ nama̍sā vidhema te | yaccha̍ṁ ca̱ yośca̱ manu̍rāya̱je pi̱tā tada̍śyāma̱ tava̍ rudra̱ praṇī̍tau̱ svāhā̎ ||

150 मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा न॒ उक्ष॑न्तमु॒त मा न॑ उक्षि॒तम् । मा नो॑ऽवधीः पि॒तरं॒ मोत मा॒तरं॑ प्रि॒या मा न॑स्त॒नुवो॑ रुद्र रीरिषः॒ स्वाहा॓ ॥

mā no̍ ma̱hānta̍mu̱ta mā no̍ arbha̱kaṁ mā na̱ ukṣa̍ntamu̱ta mā na̍ ukṣi̱tam | mā no̍'vadhīḥ pi̱tara̱ṁ mota mā̱tara̍ṁ pri̱yā mā na̍sta̱nuvo̍ rudra rīriṣa̱ḥ svāhā̎ ||

151 मा न॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः । वी॒रान्मा नो॑ रुद्र भामि॒तोऽव॑धीर्ह॒विष्म॑न्तो॒ नम॑सा विधेम ते॒ स्वाहा॓ ॥

mā na̍sto̱ke tana̍ye̱ mā na̱ āyu̍ṣi̱ mā no̱ goṣu̱ mā no̱ aśve̍ṣu rīriṣa̱ḥ | vī̱rānmā no̍ rudra bhāmi̱to'va̍dhīrha̱viṣma̍nto̱ nama̍sā vidhema te̱ svāhā̎ ||

152 आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः स्वाहा ॥

ārātte goghna uta pūruṣaghne kṣayadvīrāya sumnamasme te astu | rakṣā ca no adhi ca deva brūhyadhā ca naḥ śarma yaccha dvibarhāḥ svāhā | |

153 स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः स्वाहा ॥

stuhi śrutaṁ gartasadaṁ yuvānaṁ mṛganna bhīmamupahatnumugram | mṛḍā jaritre rudra stavāno anyante asmannivapantu senāḥ svāhā | |

154 परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मति रघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय स्वाहा ॥

pariṇo rudrasya hetirvṛṇaktu pari tveṣasya durmati raghāyoḥ | ava sthirā maghavadbhyastanuṣva mīḍhvastokāya tanayāya mṛḍaya svāhā | |

155 मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि स्वाहा ॥

mīḍhuṣṭama śivatama śivo naḥ sumanā bhava | parame vṛkṣa āyudhannidhāya kṛttiṁ vasāna ācara pinākaṁ bibhradāgahi svāhā | |

156 विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रगं हेतयोन्यमस्मन्निवपन्तु ताः स्वाहा ॥

vikirida vilohita namaste astu bhagavaḥ | yāste sahasragṁ hetayonyamasmannivapantu tāḥ svāhā | |

157 सहस्राणि सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि स्वाहा ॥

sahasrāṇi sahasradhā bāhuvostava hetayaḥ | tāsāmīśāno bhagavaḥ parācīnā mukhā kṛdhi svāhā | |

158 सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

sahasrāṇi sahasraśo ye rudrā adhi bhūmyām | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā | |

159 अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

asminmahatyarṇave'ntarikṣe bhavā adhi | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā | |

160 नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

nīlagrīvāḥ śitikaṇṭhāḥ śarvā adhaḥ kṣamācarāḥ | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā ||

161 नीलग्रीवाः शितिकण्ठा दिवगं रुद्रा उपश्रिताः । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

nīlagrīvāḥ śitikaṇṭhā divagṁ rudrā upaśritāḥ | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā ||

162 ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

ye vṛkṣeṣu saspiñjarā nīlagrīvā vilohitāḥ | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā ||

163 ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

ye bhūtānāmadhipatayo viśikhāsaḥ kapardinaḥ | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā ||

164 ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

ye anneṣu vividhyanti pātreṣu pibato janān | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā ||

165 ये पथां पथिरक्षय ऐलबृदा यव्युधः । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

ye pathāṁ pathirakṣaya ailabṛdā yavyudhaḥ | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā ||

166 ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

ye tīrthāni pracaranti sṛkāvanto niṣaṅgiṇaḥ | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā ||

167 य एतावन्तश्च भूयागंसश्च दिशो रुद्रा वितस्थिरे । तेषागं सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥

ya etāvantaśca bhūyāgṁsaśca diśo rudrā vitasthire | teṣāgṁ sahasrayojane'vadhanvāni tanmasi svāhā ||

168 नमो रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि स्वाहा ॥

namo rudrebhyo ye pṛthivyāṁ yeṣāmannamiṣavastebhyo daśa prācīrdaśa dakṣiṇā daśa pratīcīrdaśodīcīrdaśordhvāstebhyo namaste no mṛḍayantu te yaṁ dviṣmo yaśca no dveṣṭi taṁ vo jambhe dadhāmi svāhā ||

169 नमो॑ रु॒द्रेभ्यो॒ ये᳚ऽन्तरि॑क्षे॒ येषां॒ वात॒ इष॑व॒स्तेभ्यो॒ दश॒ प्राची॒र्दश॑ दक्षि॒णा दश॑ प्र॒तीची॒र्दशोदी॑ची॒र्दशो॒र्ध्वास्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि॒ स्वाहा᳚ ॥

namo̍ ru̱drebhyo̱ ye̎'ntari̍kṣe̱ yeṣā̱ṁ vāta̱ iṣa̍va̱stebhyo̱ daśa̱ prāci̱rdaśa̍ dakṣi̱ṇā daśa̍ pra̱tīci̱rdaśodi̍ci̱rdaśo̱rdhvāstebhyo̱ nama̱ste no̍ mṛḍayantu̱ te yaṁ dvi̱ṣmo yaśca̍ no̱ dveṣṭi̱ taṁ vo̱ jambhe̍ dadhāmi̱ svāhā̎ ||

170 नमो॑ रु॒द्रेभ्यो॒ ये दि॒वि येषां᳚ व॒र्॒षमिष॑व॒स्तेभ्यो॒ दश॒ प्राची॒र्दश॑ दक्षि॒णा दश॑ प्र॒तीची॒र्दशोदी॑ची॒र्दशो॒र्ध्वास्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जम्भे॑ दधामि॒ स्वाहा᳚ ॥

namo̍ ru̱drebhyo̱ ye di̱vi yeṣā̎ṁ va̱ṟṣamiṣa̍va̱stebhyo̱ daśa̱ prāci̱rdaśa̍ dakṣi̱ṇā daśa̍ pra̱tīci̱rdaśodi̍ci̱rdaśo̱rdhvāstebhyo̱ nama̱ste no̍ mṛḍayantu̱ te yaṁ dvi̱ṣmo yaśca̍ no̱ dveṣṭi̱ taṁ vo̱ jambhe̍ dadhāmi̱ svāhā̎ ||

# Camakam

1 अग्नाविष्णू सजोषसेमावर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतग्ग् स्वाहा ॥

agnāviṣṇū sajoṣasemāvardhantu vāṁ giraḥ |
dyumnairvājebhirāgatagg svāhā | | | |

2 वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मे अस्थानि च मे परूग्ंषि च मे शरीराणि च मे स्वाहा ॥

vājaśca me prasavaśca me prayatiśca me prasitiśca me dhītiśca me kratuśca me svaraśca me ślokaśca me śrāvaśca me śrutiśca me jyotiśca me suvaśca me prāṇaśca me'pānaśca me vyānaśca me'suśca me cittaṁ ca ma ādhītaṁ ca me vākca me manaśca me cakṣuśca me śrotraṁ ca me dakṣaśca me balaṁ ca ma ojaśca me sahaśca ma āyuśca me jarā ca ma ātmā ca me tanūśca me śarma ca me varma ca me'ṅgāni ca me asthāni ca me parūgṁṣi ca me śarīrāṇi ca me svāhā | |

3 ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे स्वाहा ॥

jyaiṣṭhyaṁ ca ma ādhipatyaṁ ca me manyuśca me bhāmaśca me'maśca me'mbhaśca me jemā ca me mahimā ca me varimā ca me prathimā ca me varṣmā ca me drāghuyā ca me vṛddhaṁ ca me vṛddhiśca me satyaṁ ca me śraddhā ca me jagacca me dhanaṁ ca me vaśaśca me tviṣiśca me krīḍā ca me modaśca me jātaṁ ca me janiṣyamāṇaṁ ca me sūktaṁ ca me sukṛtaṁ ca me vittaṁ ca me vedyaṁ ca me bhūtaṁ ca me bhaviṣyacca me sugaṁ ca me supathaṁ ca ma ṛddhaṁ ca ma ṛddhiśca me kḷptaṁ ca me kḷptiśca me matiśca me sumatiśca me svāhā | |

4 शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे स्वाहा ॥

śaṁ ca me mayaśca me priyaṁ ca me'nukāmaśca me kāmaśca me saumanasaśca me bhadraṁ ca me śreyaśca me vasyaśca me yaśaśca me bhagaśca me draviṇaṁ ca me yantā ca me dhartā ca me kṣemaśca me dhṛtiśca me viśvaṁ ca me mahaśca me saṁvicca me jñātraṁ ca me sūśca me prasūśca me sīraṁ ca me layaśca ma ṛtaṁ ca me'mṛtaṁ ca me'yakṣmaṁ ca me'nāmayacca me jīvātuśca me dīrghāyutvaṁ ca me'namitraṁ ca me'bhayaṁ ca me sugaṁ ca me śayanaṁ ca me sūṣā ca me sudinaṁ ca me svāhā ||

5 ऊर्क्चं मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे स्वाहा ॥

ūrkca me sūnṛtā ca me payaśca me rasaśca me ghṛtaṁ ca me madhu ca me sagdhiśca me sapītiśca me kṛṣiśca me vṛṣṭiśca me jaitraṁ ca ma audbhidyaṁ ca me rayiśca me rāyaśca me puṣṭaṁ ca me puṣṭiśca me vibhu ca me prabhu ca me bahu ca me bhūyaśca me pūrṇaṁ ca me pūrṇataraṁ ca me'kṣitiśca me kūyavāśca me'nnaṁ ca me'kṣucca me vrīhayaśca me yavāśca me māṣāśca me tilāśca me mudgāśca me khalvāśca me godhūmāśca me masurāśca me priyaṁgavaśca me'ṇavaśca me śyāmākāśca me nīvārāśca me svāhā ||

6 अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मे अकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे अर्थश्च म एमश्च म इतिश्च मे गतिश्च मे स्वाहा ॥

aśmā ca me mṛttikā ca me girayaśca me parvatāśca me sikatāśca me vanaspatayaśca me hiraṇyaṁ ca me'yaśca me sīsaṁ ca me trapuśca me śyāmaṁ ca me lohaṁ ca me'gniśca ma āpaśca me vīrudhaśca ma oṣadhayaśca me kṛṣṭapacyaṁ ca me akṛṣṭapacyaṁ ca me grāmyāśca me paśava āraṇyāśca yajñena kalpantāṁ vittaṁ ca me vittiśca me bhūtaṁ ca me bhūtiśca me vasu ca me vasatiśca me karma ca me śaktiśca me arthaśca ma emaśca ma itiśca me gatiśca me svāhā ||

7 अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्द्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे स्वाहा ॥

agniśca ma indraśca me somaśca ma indraśca me savitā ca ma indraśca me sarasvatī ca ma indraśca me pūṣā ca ma indraśca me bṛhaspatiśca ma indraśca me mitraśca ma indraśca me varuṇaśca ma indraśca me tvaṣṭā ca ma indraśca me dhātā ca ma indraśca me viṣṇuśca ma indraśca me'śvinau ca ma indraśca me marutaśca ma indraśca me viśve ca me devā indraśca me pṛthivī ca ma indraśca me'ntarikṣaṁ ca ma indraśca me dyauśca ma indraśca me diśaśca ma indraśca me mūrddhā ca ma indraśca me prajāpatiśca ma indraśca me svāhā | |

8 अगंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मे अधिपतिश्च म उपागंशुश्च मे अन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मे अतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे स्वाहा ॥

agṁśuśca me raśmiśca me'dābhyaśca me adhipatiśca ma upāgṁśuśca me antaryāmaśca ma aindravāyavaśca me maitrāvaruṇaśca ma āśvinaśca me pratiprasthānaśca me śukraśca me manthī ca ma āgrayaṇaśca me vaiśvadevaśca me dhruvaśca me vaiśvānaraśca ma ṛtugrahāśca me atigrāhyāśca ma aindrāgnaśca me vaiśvadevaśca me marutvatīyāśca me māhendraśca ma ādityaśca me sāvitraśca me sārasvataśca me pauṣṇaśca me pātnīvataśca me hāriyojanaśca me svāhā | |

9 इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मे अधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मे अवभृथश्च मे स्वगाकारश्च मे स्वाहा ॥

idhmaśca me barhiśca me vediśca me dhiṣṇiyāśca me srucaśca me camasāśca me grāvāṇaśca me svaravaśca ma uparavāśca me adhiṣavaṇe ca me droṇakalaśaśca me vāyavyāni ca me pūtabhṛcca ma ādhavanīyaśca ma āgnīdhraṁ ca me havirdhānaṁ ca me gṛhāśca me sadaśca me puroḍāśāśca me pacatāśca me avabhṛthaśca me svagākāraśca me svāhā | |

10 अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मे अदितिश्च मे दितिश्च
मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्ताम ऋक्च मे साम च मे स्तोमश्च मे यजुश्च मे
दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मे अहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताग्
स्वाहा ॥ ॥

agniśca me gharmaśca me'rkaśca me sūryaśca me prāṇaśca me'śvamedhaśca me pṛthivī ca me aditiśca me ditiśca me dyauśca me śakvarīraṅgulayo diśaśca me yajñena kalpantām ṛkca me sāma ca me stomaśca me yajuśca me dīkṣā ca me tapaśca ma ṛtuśca me vrataṁ ca me ahorātrayorvṛṣṭyā bṛhadrathantare ca me yajñena kalpetāg svāhā | |

11 गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी
च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म वेहच्च
मेऽनड्वाञ्च मे धेनुश्च म उक्षा च मे वशा च म ऋषभश्च मे आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन
कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताग् श्रोत्रं यज्ञेन कल्पतां
मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताग् स्वाहा ॥

garbhāśca me vatsāśca me tryaviśca me tryavī ca me dityavāṭ ca me dityauhī ca me pañcāviśca me pañcāvī ca me trivatsaśca me trivatsā ca me turyavāṭ ca me turyauhī ca me paṣṭhavāṭ ca me paṣṭhauhī ca ma ukṣā ca me vaśā ca ma ṛṣabhaśca me vehacca me'naḍvāñca me dhenuśca ma āyuryajñena kalpatāṁ prāṇo yajñena kalpatāmapāno yajñena kalpatāṁ vyāno yajñena kalpatāṁ cakṣuryajñena kalpatāg śrotraṁ yajñena kalpatāṁ mano yajñena kalpatāṁ vāgyajñena kalpatāmātmā yajñena kalpatāṁ yajño yajñena kalpatāg svāhā | |

12 एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे
सप्तदश च मे नवदश च म एकविंगंशतिश्च मे त्रयोविंगंशतिश्च मे पञ्चविंगंशतिश्च मे सप्तविगंशतिश्च
मे नवविंगंशतिश्च म एकत्रिंगंशच्च मे त्रयस्त्रिंगंशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च
मे विंगंशतिश्च मे चतुर्विंगंशतिश्च मेऽष्टाविगंशतिश्च मे द्वात्रिगंशच्च मे षट्त्रिगंशच्च मे चत्वारिगंशच्च
मे चतुश्चत्वारिंगंशच्च मे अष्टाचत्वारिंगंशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्द्धा च
व्यश्नियश्च आन्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च स्वाहा ॥

ekā ca me tisraśca me pañca ca me sapta ca me nava ca ma ekādaśa ca me trayodaśa ca me pañcadaśa ca me saptadaśa ca me navadaśa ca ma ekavigṁśatiśca me trayovigṁśatiśca me pañcavigṁśatiśca me saptavigṁśatiśca me navavigṁśatiśca ma ekatrigṁśacca me trayastrigṁśacca me catasraśca me'ṣṭau ca me dvādaśa ca me ṣoḍaśa ca me vigṁśatiśca me caturvigṁśatiśca me'ṣṭāvigṁśatiśca me dvātrigṁśacca me ṣaṭtrigṁśacca me catvārigṁśacca me catuścatvārigṁśacca me aṣṭācatvārigṁśacca me vājaśca

prasa̱vaścā̍pi̱jaśca̱ kratu̍śca̱ suva̍śca mū̱rddhā ca̱
vyaśñi̍yaśca āntyāya̱naścāntya̍śca bhauva̱naśca̱
bhuva̍na̱ścādhi̍patiśca̱ svāhā̎ ||